# कालिदासीयकृतिषु नारीस्वरूपविवेचनम्

**पुरुषोत्तमकुमारः**

**कूटशब्दाः** – *चेतनत्वम्, पतिव्रता ,वात्सल्यभावः, तपश्चर्या*

**शोधसारः** - *भगवतो ब्रह्मणो मायास्वरूपं जगदिदम्। अस्य जगतः स्थितिः नारीपुरूषयोः समभावसत्तायां भवति। यथा कस्यचिद् रथस्य गतिः सम्भावस्थस्य चक्रद्वयस्य सत्तायां भवति, तथैव संसारस्यास्याग्रे सरणं नारीपुरुषयोरुभयोः सत्त्वयोर्भवति, न तु एकस्य सत्त्वे। उक्तं यथा – यथा हि एकेन चक्रेण न रथस्य गतिर्भवेत् (हितोपदेशस्य मित्रलाभे- श्लो.सं.-32) । नारीशक्तिप्रधानभारतवर्षमिदं राधाकृष्णसीतारामादिपदप्रयोगात्। अतोऽत्र विश्वप्रसिद्धस्य कनिष्ठिकाधिष्ठितकविकुलगुरुकालिदास्य कृतिषु नारीचेतनत्वं अथवा नारीस्वरूपं कीदृशं वर्तते, तस्य प्रतिपादनमत्र क्रियते।*

"वाक्यार्थज्ञानं प्रति पदार्थज्ञानं कारणमि"ति न्यायेन सर्वादौ शीर्षकस्थपदस्यानुशीलनमावश्यकम्। तत्र "नारीचेतनत्वमि"ति पदं परिशीलितुं योग्यम्। 'चिती-संज्ञाने[1] इति धातोः युच्प्रत्यये "युवोरनाकौ"[2] इति सूत्रेण अनादेशे स्त्रीत्वविवक्षायां टापि चेतनाशब्दो निष्पद्यते। तस्मात् भावार्थे "तस्य भावस्त्वतलौ"[3] इति पाणिनीयसूत्रेण त्वप्रत्यये सति चेतनत्वमिति पदं निष्पद्यते। तदनन्तरं नार्याः चेतनत्वमिति विग्रहवाक्ये नारीशब्देन सह षष्ठीसमासत्वात् नारीचेतनत्वं पदं सिद्ध्यति ।

संसारेऽस्मिन् नारीणां कालानुगुणं स्वरूपं भिन्नं-भिन्नं भवति। यथा- पुत्री-पत्नी-मात्रादयः। एतेषां समेषां स्वरूपाणां वर्णनं कनिष्ठिकाधिष्ठितकविकुलगुरुकालिदासेन स्वकीयेषु नैकेषु ग्रन्थेषु कृतं विद्यते। नारीणां प्रथमस्वरूपं पुत्रीति भवति। पुत्रीणां वर्णनं महाकविकालिदासः स्वकीयसाहित्यरचनायां सम्यग्रूपेण करोति। अपत्यानां दायित्वं पितुः धर्मकर्मणि साहाय्यम्। वनवासी महर्षिः कण्वः वनस्थवृक्षेषु प्राणिषु स्निह्यति। पुत्री शकुन्तला अपि स्वकीयपितुः धर्मकर्मणि सहायतां करोति। सा आश्रमस्थान् सर्वान् जीवान् वृक्षांश्च सस्नेहेन पालयति, यतोहि तस्यां स्नेहभावः अधिको वर्तते। यदा सा स्वकीयभर्तुः दुष्यन्तस्य गृहं गच्छति, तदा आश्रमस्थानां वृक्षाणां पशूनां वर्णनं कुर्वन् महाकविकालिदास एतद् विशदयति यत् शकुन्तलायाः पतिगृहगमनवेदनया आश्रमस्य हरिणः स्वमुखात् चर्बितदर्भान् परित्यजति, मयूराः स्वकीयं नृत्यं स्थगयन्तीति च । वृक्षाः अश्रुरूपाणि स्वकीयानि पाण्डुपत्राणि मुञ्चन्ति। उक्तं यथा-

**उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः।**
**अपसृतपाण्डुपत्रा मुञ्चंत्यश्रुणीव लताः॥[4]**

शकुन्तलायाः स्नेहेन स्नेहितस्य महर्षिकण्वस्य वर्णनं कुर्वन् महाकविकालिदासो वदति यत् अद्य शकुन्तला पतिगृहं यास्यतीति ज्ञात्वा तस्य महर्षेः हृदयमुत्कण्ठतया रोदितुमिच्छति, किन्तु सः स्वकीयहृदयगतजलं कण्ठे स्थापयति, तेन तस्य कण्ठः अवरूद्धो जातः। कण्वमाध्यमेन कालिदासः कथयति यत् मादृशानां वनवासिनामीदृशी स्थितिः वर्तते तर्हि पुत्रीस्नेहेन स्नेहितानां गृहस्थानां कीदृशी स्थितिर्भवेत्, तद्धि -

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**
**कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।**
**वैकल्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः**
**पीड्यन्ते गृहिणः कथं नु तनया विश्लेषदुःखैर्नवैः॥[5]**

कालिदासः कुमारसम्भवमहाकाव्ये अपि पार्वत्याः पतिगृहगमनसमये राज्ञो हिमालयस्य पुत्रीवियोगजनितदुःखस्य वर्णनं करोति। वदति च-

**सोऽनुमान्य हिमवन्तमात्मभूरात्मजाविरहदुःखखेदितम्।[6]**

नार्यः सर्वदा स्वकीयधर्मस्य कर्त्तव्यस्य च पालनं कुर्वन्ति। अस्य प्रतिपादनं महाकविकालिदास: करोति यत् पुत्री शकुन्तला यद्यपि पतिगृहं गच्छति तथाऽपि स्वकीयं पितरं महर्षिकण्वं भूय आश्लिष्य तं तोषयति यत् भवान् मम विषये अधिकं न चिन्तयतु, यतोहि तपश्चर्यया भवतां शरीरं पूर्वत एव पीडितं वर्तते। अर्थात् तस्याः कथनस्याशयो यत् मच्चिन्तया भवता पीडा अनुभविष्यते । उक्तं यथा-

"भूयः पितरमाश्लिष्य तपश्चरणपीडितं तातशरीरं तन्मातिमात्रं मम कृते उत्कण्ठितुम्"[7] । अधुना अपि अस्माभिः दृश्यते यदा पाणिग्रहणसंस्कारानन्तरं पुत्री पतिगृहं याति, तस्मिन्समये कठोरहृदययुक्तपितॄणां परिजनानाञ्च नेत्रं सजलं भवति। अनेन वर्णनेन महाकविकालिदास: नारीणां सौहार्दव्यवहारं सस्नेहव्यवहारं च स्पष्टयति। यदा पुत्री पितागृहे निवसति तदा सर्वं संरक्षणस्य दायित्वं पितुर्भवति। किंतु पुत्रीणामपि कर्त्तव्यं भवति यद् गृहाद् बहिर्गन्तव्यं चेद् गृहजनान् पृष्ट्वैव गन्तव्यमिति। तच्च कर्त्तव्यपालनं पार्वत्या कृतम्। सा यद्यपि तपश्चर्यां कर्त्तुं दृढनिश्चया आसीत्, तथाऽपि विना पृष्ट्वैव न गन्तव्यमिति कर्त्तव्यं वहन्ती पार्वती तपश्चर्यायै सखीमुखेन पितरं पृच्छति आज्ञाञ्च याचयति। उक्तं यथा महाकविकालिदासेन -

**कदाचिदासन्नसखीमुखेन सा मनोरथज्ञं पितरं मनस्विनी।**
**अयाचतारण्यनिवासमात्मनः फलोदयांताय तपः समाधये॥[8]**

अत्र महाकविकालिदासेन कर्त्तव्यनिष्ठनारीणां वर्णनं कृतमस्ति। नारीणां दृढेच्छायाः सत्यसङ्कल्पस्य च वर्णनं कविना कुमारसम्भवे कृतं विद्यते। सुयोग्यं पतिमर्थात् शिवं प्राप्तुं कृतसंकल्पा पार्वती तपश्चर्यां करोति। यद्यपि सा राज्ञः हिमाचलस्य पुत्री आसीत्, तथाऽपि सा कठोरतपस्यां कृत्वा शिवं प्राप्तवती। तस्याः तपस्यापद्धतिं ज्ञात्वा प्राणिमात्रेषु करूणभावो जायते यत् कथं सुकुमारपार्वती चतुर्दिक्षु अग्निं प्रज्वाल्य तन्मध्ये च भूत्वा तपस्यां करोतीति। उक्तं यथा-

**शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा।**
**विजित्य नेत्रप्रतिघातिनीं प्रभामनन्यदृष्टिः सवितारमैक्षत॥[9]**

पार्वत्याः दृढतपश्चर्यया शिवः आदौ तस्याः समक्षं ब्रह्मचारिरूपेण समागच्छति। तदनन्तरं शिवं निन्दति। यतः पार्वत्याः सुदृढभक्तिः प्रीतिश्च शिवे वर्तते, अत: सा ब्रह्मचारिणं वाचा ताडयति यतोहि स तस्याः आराध्यस्य निन्दामकरोत्। आह च-

**उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम्।**
**अलोक्सामान्यमचिंत्यहेतुकं द्विषंति मन्दाश्चरितं महात्मनाम्॥**[10]

पार्वत्याः दृढसङ्कल्पं भक्तिं प्रीतिश्च दृष्ट्वा सर्वं चानुभूय भगवान् शिवः पार्वत्याः समक्षं दासत्वमङ्गीकुर्वन् वदति-

**अद्यप्रभृत्यवनाङ्गि तवास्मि दासः क्रीतस्तपोभिरिति वादिनि चन्द्रमौलि!**
**अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेशः फलेन हि पुनर्नवतां विधत्ते॥**[11]

अत्रास्माभिरवलोकितं यत् महाकविकालिदासः स्वकीयासु कृतिषु कीदृशीनां तपोनिष्ठरूपाणां नारीणां वर्णनं करोति। तासां वैशिष्ट्यमपि जगद्गुरुशङ्कराचार्येण देव्यपराधक्षमापनस्तोत्रे प्रतिपादितम्। तैरुक्तं यत् भगवति शिवे यत्किमपि दृश्यते यथा चिताभस्मालेपनम्, विषभक्षणम्, भुजगपतिधरणम्, जगदीशपदवीधारणमित्येतत्सर्वं भवत्या सह पाणिग्रहणसंस्कारस्यैव फलम्। अर्थाद् विवाहोपरान्तं कल्याणरूपशिवस्य शक्तिः महत्त्वञ्च वर्धितं जातमिति। उक्तं यथा-

**चिताभस्मालेपो गरलमशनं दिक्पटधरो**
**जटाधारी कण्ठे भुजगपतिहारी पशुपतिः।**
**कपाली भूतेशो भजति जगदीशैकपदवीं**
**भवानी त्वत्पाणिग्रहणपरिपाटीफलमिदम्॥**[12]

पुनश्च कालिदासः अभिज्ञानशाकुन्तले दुष्यन्तं प्रतिव्रताशकुन्तलायाः समक्षमवनतं करोति। यतोहि यद्यपि स शापवशेन पूर्वं शकुन्तलां नाङ्गीकृतवान्, तथाऽपि शापनाशे सति स्वकीयदोषं मत्वा स शकुन्तलायाः पदयोः पतित्वा क्षमां याचयन् वदति यन्मया कृतं तद्हृदि न धारयतु । मया धर्मशीलनारीणामनादरः कृत:। अतो मां क्षमस्व। उक्तं यथा दुष्यन्तेन-

**सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते**
**किमपि मनसः सम्मोहो मे तदा बलवानभूत्।**
**प्रबलतमसामेव प्रायाः शुभेषु हि वृत्तयः**
**स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया॥**[13]

अपि च - **मोहान्मया सुतनु पूर्वमुपेक्षिस्ते यो वाष्पबिन्दुरधरं परिबाधमानः।**
**तं तावदाकुटिलपक्ष्मविलग्नमद्य वाष्पं प्रमृज्य विगतानुशयो भवेयम्॥**[14]

महाकविकालिदासस्य ग्रन्थस्याध्ययनेनैवं भाति यत् वात्सल्यभावः पुरुषाणामपेक्षया नारीष्वधिको भवति। वात्सल्यभावस्य स्पष्टोदाहरणमस्माभिः कुमारसम्भवमहाकाव्ये द्रष्टुं शक्यते। यदा माता पार्वती परिभ्रमन्ती स्वकीयपुत्रं कार्तिकेयमपश्यत्तदा तस्याः स्थितिरतीव वात्सल्ययुक्ताऽऽसीत्। तस्मिन्समये इन्द्रादिदेवाः तां नमस्कारमकुर्वन्, किन्तु पुत्रं ग्रहीतुमुत्कण्ठमानसा पार्वती तान् देवान् न दृष्ट्वती, पुत्रं चाङ्के स्थापितवती। साऽतीवानन्देन पुत्रं पश्यति। आनन्दाधिक्येन तस्या नेत्रं सजलं जातम्। तस्याः सम्पूर्णशरीरे वात्सल्यभावो दृष्टिगोचरो भवति। सा पुत्रं द्रष्टुं सहस्रनेत्रं कामयते। एषा कामना वात्सल्यभावस्य फलमेव। उक्तं यथा-

**किरीटबद्धाञ्जिभिर्नभःस्थैर्नमस्कृता सत्वरनाकिलोकैः।**
**विमानतोऽवातरदात्मजं तं ग्रहीतुमुत्कण्ठितमानसाऽभूत्॥**[15]
**सुविस्मयानन्दविकस्वरायाः शिशुर्गलाद्वाष्पतरङ्गितायाः।**
**विवृद्धवात्सल्यरसोत्तराया देव्या दृशोर्गोचरतां जगाम॥**
**तमीक्षमाणा क्षणमीक्षणानां सहस्रमाप्तुं विनिमेषमैच्छत्।**
**सा नन्दनालोकनमङ्गलेषु क्षणं क्षणं तृप्यति कस्य चेतः॥**[16]

अधुनाऽपि समाजे दृश्यते यत् प्रथमकक्षातः पञ्चकक्षापर्यन्तं छात्राणामध्यापनाय प्रायः शिक्षिकानामेव नियुक्तिर्भवति। तत्र कारणं वात्सल्यभाव एवेति। एतस्यां कक्षायामध्ययनरतान् छात्रान् अध्यापयितुं शिक्षिका एव कुशला इति स्वीक्रियते, यतोहि तेषु छात्रेषु ज्ञानस्य सम्प्रेषणं वात्सल्यभावद्वारैव कर्त्तुं शक्यते।

महाकविकालिदासस्य कृतीनां महत्त्वं नारीपात्रस्य समुचितवर्णनेन वर्तते। स्वकीयसहित्ये स सर्वत्र नारीणां वर्णनं परिस्थितिकालानुगुणमकरोत्। यथा - महाकविकालिदासेन विरचिताभिज्ञाशाकुन्तलनाटकस्य विषये निम्निलिखितश्लोकस्य महत्त्वं नारीणां वैशिष्ट्यप्रतिपादनादेव वर्तते। अस्मिन्नाटके नारीपात्राणां महत्त्वं पुरुषपात्राणामपेक्षया अधिकं वर्तते। अत एव नाटकस्यास्य नाम स्त्रीपात्रमाधारीकृत्य वर्तते।

तद्धि-

**काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।**
**तत्रापि चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्॥**[17]

भारतीयसंस्कृतौ विवाहपश्चात् नारीणां सर्वं पतिगृहं भवति, तस्याः सर्वविधचिन्तनमपि स्वकीयपरिवाराय भवति। सा सर्वथाऽशुभपरिस्थितौ स्वकीयपतिपरिवारजनानां कल्याणं शुभञ्च कामयते। अस्य प्रत्यक्षीकरणं कविना विरचितरघुवंशमहाकाव्यस्याध्ययनेन भवति। यदा रामः स्वकीयं कलङ्कमपसारयितुं लक्ष्मणेन सह सीतां वाल्मीक्याश्रमं प्रेषितवान्, तदा मार्गे सीतायाः दक्षिणनेत्रस्य स्फुरणं जातम्। तदानीं सा स्वकीयाशुभताविषये न चिन्तयति, अपितु स्वकीयपतिरामेण सह भ्रातॄणां विषये विचारं कृत्वा तेषां मङ्गलं कामयते। आह च-

**सा दुर्निमित्तोपगताद् विषादात्सद्यः परिम्लानमुखारविन्दा।**
**राज्ञः शिवं सावरजस्य भूयादित्याशशंसे करणैरबाह्यैः॥**[18]

भारतीयनारीणां स्वभावः पातिव्रत्यधर्मश्च कीदृशो भवतीत्यस्मिन्विषये महाकविः वदति यत् निरपराधसीता गृहाद् बहिर्भूत्वाऽपि पतिविषये किमपि न वदति, अपितु तत्र स्वकीयं दैवं कारणमित्यङ्गीकरोति। भारतीयनार्यः विपत्तावपि स्वजीवनं धर्मानुकूलमेव चालयन्ति धैर्यञ्च न परित्यजन्ति। एतच्च ज्ञानं रघुवंशमहाकाव्यस्य सीताचरित्राध्ययनेन भवति। अभिज्ञानशाकुन्तलेऽपि शाकुन्तलायाः जीवनचरित्रं तथैवास्ति। एते द्वे नार्यौ सङ्कटसमयेऽपि धर्मशास्त्रविरुद्धमाचरणं नैवाकुर्वतः तथा च ईश्वरसमराध्यन्त्यौ भारतगौरववर्धनायोत्तमसन्तानमदत्ताम्। आह च-

**न चावदद्भर्तुरवर्णमार्या निराकरिष्णोर्वृजिनदृतेऽपि।**
**आत्मानमेव स्थिरदुःखभाजं पुनःपुनर्दुष्कृतिनं निनिन्द॥**[19]

उपर्युक्तपद्यस्याध्ययनेन सीता नीतिशास्त्रं जानाति स्म इति भाति यतोहि नीतिशास्त्रं सुखदुःखयोः कारणं कश्चिदन्यः व्यक्तिविशेषोऽस्ति इति नाङ्गीकरोति, अपितु तस्मिन् कारणे जनानां स्वकीयं कर्म भवति। उक्तं यथा-

**सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबुद्धिरेषा ।**[20]

अनेन प्रकारेण कालिदासीयकृतीनां परिशीलनेन ज्ञायते यत् महाकविकालिदासः स्वकीयग्रन्थेषु पुरुषाणामपेक्षया नारीणां महत्त्वं वैशिष्ट्यञ्चाधिकं प्रत्यपादयत्। तस्य ग्रन्थेषु वर्णितपुरुषा अपि तत्र वर्णितनारीणां सम्मानमादरञ्चाकुर्वन्। तस्य फलं यत् कालिदासीयकृतिषु वर्णितनारीणामपत्यानि देवाः देवस्वरूपाः वा सन्ति। अतो "यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः"[21] इति स्मृतिवचनमपि कालिदासीयकृतिषु चरितार्थतां याति।

## सन्दर्भाः-


1. सिद्धान्तकौमुद्यां भ्वादिगणे धातुसंख्या-39
2. अष्टाध्याय्याम्-7/1/1
3. तत्रैव-5/1/119
4. अभिज्ञानशाकुन्तले- 4/12
5. तत्रैव-4/6
6. कुमारसम्भवे-8/21
7. अभिज्ञानशाकुन्तलस्य चतुर्थोङ्के।
8. कुमारसम्भवे-15/06
9. तत्रैव -15/20

10. तत्रैव -15/75

11. तत्रैव -15/86

12. देव्यपराधक्षमापनस्तोत्रे- श्लो.सं.-7

13. अभिज्ञानशाकुन्तले-7/24

14. तत्रैव -7/25

15. कुमारसम्भवे-11/16

16. तत्रैव -11/19-20

17.- संस्कृतसाहित्येतिहासे

18.रघुवंशमहाकाव्ये-14/50

19. तत्रैव -14/57

20. सुभाषितसंग्रहे

21. मनुस्मृतौ-3/56